# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-अक्टूबर-२०१९

| कक्षा -शास्त्रिप्रथमवर्षम् (SEM-1) | प्रश्नपत्रम् – ६ | गुणाः – ७० |
|---|---|---|
| विषयः – साहित्यम् | (C.C.- 1.1.2. New & Old ) | समयः -११.३० तः ०२.३० |
| दिनाङ्कः – १५/१०/२०१९ | सन्दर्भग्रन्थः – रघुवंशम् – द्वितीयः सर्गः | |

**प्रथमान्वितिः**

**प्रश्नः १ निम्नेषु द्वयोः ससन्दर्भं व्याख्यां लिखत।** १०

(१) व्रताय तेनानुचरेण धेनोर्न्यषेधि शेषोऽप्यनुयायिवर्गः।
न चान्यतस्य शरीररक्षा स्ववीर्यगुप्ता हि मनोः प्रसूतिः॥

(२) धनुर्भृतोऽप्यस्य दयाऽऽर्द्रभावमाख्यातमन्तःकरणैर्विशङ्कैः।
विलोकयन्त्यो वपुरापुरक्ष्णां प्रकामविस्तारफलं हरिण्यः॥

(३) पुरस्कृता वर्त्मनि पार्थिवेन प्रत्युद्गता पार्थिवधर्मपत्न्या।
तदन्तरे सा विरराज धेनुर्दिनक्षपामध्यगतेव सन्ध्या॥

**प्रश्नः २ कस्याप्येकस्य सविस्तरेणोत्तरं लिखत।** १०

(१) कालिदासस्य जीवनपरिचयं सविस्तरं लिखत।

(२) रघुवंशमहाकाव्यस्य विशेषतां वर्णयतु ।

**द्वितीयान्वितिः**

**प्रश्नः ३ द्वयोः सन्दर्भपूर्वकं व्याख्यां कुर्वन्तु।** १०

(१) वत्सोत्सुकाऽपि स्तिमिता सपर्यां प्रत्यग्रहीत्सेति ननन्दतुस्तौ।
भक्त्योपपन्नेषु हि तद्विधानां प्रसादचिह्नानि पुरःफलानि॥

(२) तमार्यगृह्यं निगृहीतधेनुर्मनुष्यवाचा मनुवंशकेतुम्।
विस्मापयन्विस्मितमात्मवृत्तौ सिंहोरुसत्त्वं निजगाद सिंहः॥

(३) तस्यालमेषा क्षुधितस्य तृप्त्यै प्रदिष्टकाला परमेश्वरेण।
उपस्थिता शोणितपारणा मे सुरद्विषश्चान्द्रमसी सुधेव॥

**प्रश्नः ४ कस्याप्येकस्य विस्तरेणोत्तरं लिखत।** १०

(१) दिलीपस्य गोसेवावर्णनं रघुवंशद्वितीयसर्गाधारेण लिखत।

(२) दिलीपसिंहयोः संवादं यथाग्रन्थं वर्णयत।

## तृतीयान्वितिः

**प्रश्नः ५ द्वयोः सन्दर्भपूर्वकं व्याख्यां कुर्वन्तु।** १०

(१) स त्वं मदीयेन शरीरवृत्तिं देहेन निर्वर्तयितुं प्रसीद।
दिनावसानोत्सुकबालवत्सा विसृज्यतां धेनुरियं महर्षेः॥

(२) तथेति गामुक्तवते दिलीपः सद्यः प्रतिष्टम्भविमुक्तबाहुः।
स न्यस्तशस्त्रो हरये स्वदेहमुपानयत्पिण्डमिवामिषस्य॥

(३) स नन्दिनीस्तन्यमनिन्दितात्मा सद्वत्सलो वत्सहुतावशेषम्।
पपौ वसिष्ठेन कृताभ्यनुज्ञः शुभ्रं यशो मूर्तमिवातितृष्णः॥

**प्रश्नः ६ कस्याप्येकस्य सविस्तरेणोत्तरं लिखत।** १०

(१) रघुवंशस्य द्वितीयसर्गस्य कथासारं लिखत।

(२) नन्दिनीवरप्रदानस्य वर्णनं कुरुत।

## संयुक्तान्वितिः

**प्रश्नः ७ दशप्रश्नानां लघूत्तरं लिखत।** १०

(१) रघुवंशमहाकाव्ये कति सर्गाः सन्ति ?

(२) रघुवंशमहाकाव्यस्य द्वितीयसर्गे कति श्लोकाः सन्ति ?

(३) दिलीपः कस्य देशस्य राजा आसीत् ?

(४) रघुवंशमहाकाव्यं कीदृशं काव्यमस्ति ?

(५) रघुवंशस्य द्वितीये सर्गे किम् छन्दः ?

(६) महाराज्ञः दिलीपस्य भार्या का ?

(७) नन्दिनी स्वसेवकस्य परीक्षणार्थं कुत्र गतवती ?

(८) सिहं कस्य रक्षार्थं कः नियुक्तवान् ?

(९) कस्मिन् दिवसे नन्दिनी स्वसेवकस्य सेवाभावं जिज्ञासितवती ?

(१०) सुदक्षिणया सह गोसेवानियमं समाचरतो दिलीपिस्य कति दिनानि व्यतीतानि ?

(११) पुत्रकामनया दिलीपदम्पती कुत्र जग्मतुः ?

(१२) वरस्वरूपं नन्दिनीं किं ययाचे राजा ?

(१३) वशिष्ठाश्रमे सभार्यः दिलीपः कस्य सेवामकरोत् ?

(१४) सिहंः कस्य सुहृदस्ति ?

(१४) महाकविः कालिदासः कस्यालङ्कारस्य आचार्यः मन्यते ?

----oooo----